# Bhagavatipadyapushpanjalistotra Mahishasuramardini Stotra

# ભગવતીપદ્યપુષ્પાંજલિસ્તોત્રં અથવા મહિષાસુરમર્દિનિસ્તોત્રમ્

## Document Information

Text title : bhagavatIpadyapuShpA.njalistotra which includes Shri

File name : mahisha.itx

Category : devii, durgA, stotra, devI

Location : doc_devii

Author : raamakRiShNa kavii

Transliterated by : Originally A.Hudli also by G. Ramkumar ramkumar at cs.stanford.edu

Proofread by : Sunder hattangadi

Description-comments : Mahishasuramardini Stotra 21 out of 30 verses.

Latest update : October 29, 2002, October 6, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 5, 2024

*sanskritdocuments.org*

# ભગવતીપદ્યપુષ્પાંજલિસ્તોત્રં અથવા મહિષાસુરમર્દિનિસ્તોત્રમ્

શ્રી ભગવત્યૈ નમઃ ॥

ભગવતિ ભગવત્પદપઙ્કજં ભ્રમરભૂતસુરાસુરસેવિતમ્ ।
સુજનમાનસહંસપરિસ્તુતં કમલયાઽમલયા નિભૃતં ભજે ॥ ૧॥

તે ઉભે અભિવન્દેઽહં વિઘ્નેશકુલદૈવતે ।
નરનાગાનનસ્ત્વેકો નરસિંહ નમોઽસ્તુતે ॥ ૨॥

હરિગુરુપદપદ્મં શુદ્ધપદ્મેઽનુરાગાદ્-
   વિગતપરમભાગે સન્નિધાયાદરેણ ।
તદનુચરિ કરોમિ પ્રીતયે ભક્તિભાજાં
   ભગવતિ પદપદ્મે પદ્યપુષ્પાઞ્જલિં તે ॥ ૩॥

કેનૈતે રચિતાઃ કુતો ન નિહિતાઃ શુમ્ભાદયો દુર્મદાઃ
   કેનૈતે તવ પાલિતા ઇતિ હિ તત્ પ્રશ્ને કિમાચક્ષ્મહે ।
બ્રહ્માદ્યા અપિ શંકિતાઃ સ્વવિષયે યસ્યાઃ પ્રસાદાવધિ
   પ્રીતા સા મહિષાસુરપ્રમથિની ચ્છિન્દ્યાદવદ્યાનિ મે ॥ ૪॥

પાતુ શ્રીસ્તુ ચતુર્ભુજા કિમુ ચતુર્બાહોર્મહૌજાન્ભુજાન્
   ધત્તેઽષ્ટાદશધા હિ કારણગુણાઃ કાર્યે ગુણારમ્ભકાઃ ।
સત્યં દિક્પતિદન્તિસંખ્યભુજભૃચ્છમ્ભુઃ સ્વયમ્ભૂઃ સ્વયં
   ધામૈકપ્રતિપત્તયે કિમથવા પાતું દશાષ્ટૌ દિશઃ ॥ ૫॥

પ્રીત્યાઽષ્ટાદશસંમિતેષુ યુગપદ્દ્વીપેષુ દાતું વરાન્
   ત્રાતું વા ભયતો બિભર્ષિ ભગવત્યષ્ટાદશૈતાન્ ભુજાન્ ।
યદ્વાઽષ્ટાદશધા ભુજાંસ્તુ બિભૃતઃ કાલી સરસ્વત્યુભે
   મીલિત્વૈકમિહાનયોઃ પ્રથયિતું સા ત્વં રમે રક્ષ મામ્ ॥ ૬॥

છન્દઃ ॥

અયિ ગિરિનંદિનિ નંદિતમેદિનિ વિશ્વવિનોદિનિ નંદનુતે

ગિરિવરવિંધ્યશિરોધિનિવાસિનિ વિષ્ણુવિલાસિનિ જિષ્ણુનુતે ।
ભગવતિ હે શિતિકણ્ઠકુટુમ્બિનિ ભૂરિકુટુમ્બિનિ ભૂરિકૃતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧॥ ॥ ૭॥

સુરવરવર્ષિણિ દુર્ધરધર્ષિણિ દુર્મુખમર્ષિણિ હર્ષરતે
ત્રિભુવનપોષિણિ શંકરતોષિણિ કિલ્બિષમોષિણિ ઘોષરતે ।
દનુજનિરોષિણિ દિતિસુતરોષિણિ દુર્મદશોષિણિ સિન્ધુસુતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૨॥ ॥ ૮॥

અયિ જગદમ્બ મદમ્બ કદમ્બવનપ્રિયવાસિનિ હાસરતે
શિખરિશિરોમણિતુઙ્ગહિમાલયશ ૃંગનિજાલયમધ્યગતે ।
મધુમધુરે મધુકૈટભગંજિનિ કૈટભભંજિનિ રાસરતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૩॥ ॥ ૯॥

અયિ શતખણ્ડવિખણ્ડિતરુણ્ડવિતુણ્ડિતશુણ્ડગજાધિપતે
રિપુગજગણ્ડવિદારણચણ્ડપરાક્રમશુણ્ડ મૃગાધિપતે ।
નિજભુજદણ્ડનિપાતિતખણ્ડવિપાતિતમુણ્ડભટાધિપતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૪॥ ॥ ૧૦॥

અયિ રણદુર્મદશત્રુવધોદિતદુર્ધરનિર્જરશક્તિભૃતે
ચતુરવિચારધુરીણમહાશિવદૂતકૃતપ્રમથાધિપતે ।
દુરિતદુરીહદુરાશયદુર્મતિદાનવદૂતકૃતાંતમતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૫॥ ॥ ૧૧॥

અયિ શરણાગતવૈરિવધૂવરવીરવરાભયદાયકરે
ત્રિભુવનમસ્તકશૂલવિરોધિશિરોધિકૃતામલશૂલકરે ।
દુમિદુમિતામરદુંદુભિનાદમહોમુખરીકૃતતિગ્મકરે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૬॥ ॥ ૧૨॥

અયિ નિજહુઁકૃતિમાત્રનિરાકૃતધૂમ્રવિલોચનધૂમ્રશતે
સમરવિશોષિતશોણિતબીજસમુદ્ભવશોણિતબીજલતે ।
શિવશિવ શુમ્ભનિશુમ્ભમહાહવતર્પિતભૂતપિશાચરતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૭॥ ॥ ૧૩॥

ધનુરનુસંગરણક્ષણસંગપરિસ્ફુરદંગનટત્કટકે
કનકપિશંગપૃષત્કનિષંગરસદ્ભટશ ૃંગહતાવટુકે ।
કૃતચતુરઙ્ગબલક્ષિતિરઙ્ગઘટદ્બહુરઙ્ગરટદ્બટુકે

જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૮॥ ॥ ૧૪॥

સુરલલનાતતથેયિતથેયિતથાભિનયોત્તરનૃત્યરતે
હાસવિલાસહુલાસમયિ પ્રણતાર્તજનેઽમિતપ્રેમભરે ।
ધિમિકિટધિક્કટધિકટધિમિધ્વનિઘોરમૃદંગનિનાદરતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૯॥ ॥ ૧૫॥

જય જય જપ્યજયે જયશબ્દપરસ્તુતિતત્પરવિશ્વનુતે
ઝણઝણઝિઞ્ઝિમિઝિંકૃતનૂપુરસિંજિતમોહિતભૂતપતે ।
નટિતનટાર્ધનટીનટનાયકનાટિતનાટ્યસુગાનરતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૦॥ ॥ ૧૬॥

અયિ સુમનઃસુમનઃ સુમનઃ સુમનઃ સુમનોહરકાંતિયુતે
શ્રિતરજનીરજનીરજનીરજનીરજનીકરવક્ત્રવૃતે ।
સુનયનવિભ્રમરભ્રમરભ્રમરભ્રમરભ્રમરાધિપતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૧॥ ॥ ૧૭॥

સહિતમહાહવમલ્લમતલ્લિકમલ્લિતરલ્લકમલ્લરતે
વિરચિતવલ્લિકપલ્લિકમલ્લિકઝિલ્લિકભિલ્લિકવર્ગવૃતે ।
સિતકૃતફુલ્લિસમુલ્લસિતારુણતલ્લજપલ્લવસલ્લલિતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૨॥ ॥ ૧૮॥

અવિરલગણ્ડગલન્મદમેદુરમત્તમતઙ્ગજરાજપતે
ત્રિભુવનભૂષણભૂતકલાનિધિરૂપપયોનિધિરાજસુતે ।
અયિ સુદતી જનલાલસમાનસમોહનમન્મથરાજસુતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૩॥ ॥ ૧૯॥

કમલદલામલકોમલકાંતિકલાકલિતામલભાલલતે
સકલવિલાસકલાનિલયક્રમકેલિચલત્કલહંસકુલે ।
અલિકુલસઙ્કુલકુવલયમણ્ડલમૌલિમિલદ્બકુલાલિકુલે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૪॥ ॥ ૨૦॥

કરમુરલીરવવીજિતકૂજિતલજ્જિતકોકિલમઞ્જુમતે
મિલિતપુલિન્દમનોહરગુઞ્જિતરઞ્જિતશૈલનિકુઞ્જગતે ।
નિજગુણભૂતમહાશબરીગણસદ્ગુણસમ્ભૃતકેલિતલે
variation નિજગણભૂતમહાશબરીગણરઙ્ગણસમ્ભૃતકેલિરતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૫॥ ॥ ૨૧॥

કટિતટપીતદુકૂલવિચિત્રમયૂખતિરસ્કૃતચંદ્રરુચે
પ્રણતસુરાસુરમૌલિમણિસ્ફુરદંશુલસન્નખચંદ્રરુચે ।
જિતકનકાચલમૌલિપદોર્જિતનિર્ઝરકુંજરકુમ્ભકુચે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૬॥ ॥ ૨૨॥

વિજિતસહસ્રકરૈકસહસ્રકરૈકસહસ્રકરૈકનુતે
કૃતસુરતારકસઙ્ગરતારકસઙ્ગરતારકસૂનુસુતે ।
સુરથસમાધિસમાનસમાધિસમાધિસમાધિસુજાતરતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૭॥ ॥ ૨૩॥)
પદકમલં કરુણાનિલયે વરિવસ્યતિ યોઽનુદિનં સ શિવે
અયિ કમલે કમલાનિલયે કમલાનિલયઃ સ કથં ન ભવેત્ ।
તવ પદમેવ પરમ્પદમેવનુશીલયતો મમ કિં ન શિવે (પરમ્પદમિત્યનુશીલયતો)
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૮॥ ॥ ૨૪॥

કનકલસત્કલસિન્ધુજલૈરનુસિઞ્ચિનુતે ગુણ રઙ્ગભુવં
ભજતિ સ કિં ન શચીકુચકુમ્ભતટીપરિરમ્ભસુખાનુભવમ્ ।
તવ ચરણં શરણં કરવાણિ નતામરવાણિનિવાસિ શિવં
variation મૃડાનિ સદા મયિ દેહિ શિવં
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૧૯॥ ॥ ૨૫॥

તવ વિમલેન્દુકુલં વદનેન્દુમલં સકલં નનુ કૂલયતે
કિમુ પુરુહૂતપુરીન્દુમુખીસુમુખીભિરસૌ વિમુખીક્રિયતે ।
મમ તુ મતં શિવનામધને ભવતી કૃપયા કિમુત ક્રિયતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૨૦॥ ॥ ૨૬॥

અયિ મયિ દીનદયાલુતયા કૃપયૈવ ત્વયા ભવિતવ્યમુમે
અયિ જગતો જનની કૃપયાસિ યથાસિ તથાઽનુમિતાસિ રતે ।
યદુચિતમત્ર ભવત્યુરરીકુરુતાદુરુતાપમપાકુરુતે
જય જય હે મહિષાસુરમર્દિનિ રમ્યકપર્દિનિ શૈલસુતે ॥ ૨૧॥ ॥ ૨૭॥

સ્તુતિમિતસ્તિમિતઃ સુસમાધિના નિયમતોઽયમતોઽનુદિનં પઠેત્ ।
પરમયા રમયાપિ નિષેવ્યતે પરિજનોઽરિજનોઽપિ ચ તં ભજેત્ ॥ ૨૮॥

રમયતિ કિલ કર્ષસ્તેષુ ચિત્તં નરાણામવરજવરયસ્માદ્રામકૃષ્ણઃ કવીનામ્ ।
અકૃત સુકૃતિગમ્યં રમ્યપદ્યૈકહર્મ્યં સ્તવનમવનહેતું પ્રીતયે વિશ્વમાતુઃ ॥ ૨૯॥

ઇન્દુરમ્યો મુહુર્બિન્દુરમ્યો મુહુર્બિન્દુરમ્યો યતઃ સાઽનવદ્યં સ્મૃતઃ ।
શ્રીપતેઃ સૂનૂના કારિતો યોઽધુના વિશ્વમાતુઃ પદે પદ્યપુષ્પાઞ્જલિઃ ॥ ૩૦॥

ઇતિ શ્રીભગવતીપદ્યપુષ્પાઞ્જલિસ્તોત્રં સમ્પૂર્ણમ્ ॥

The inner numbering of 1 through 21, between 7 and 27
suggests the popular mahiShasuramardini stotra.

A portion of the stotra is also found in shivarahasya part 1, adhyAya 53/9-21

The stotra is incorrectly attributed to
Shankaracharya as is evident from its absense
from his complete works and as given in the
specialized link-references given in the end.

---

*Bhagavatipadyapushpanjalistotra Mahishasuramardini Stotra*
pdf was typeset on November 5, 2024

Please send corrections to *sanskrit@cheerful.com*